# Shri Yantroddharaka Mangala Ashtakam

# શ્રીયન્ત્રોદ્ધારકમઙ્ગલાષ્ટકમ્

## Document Information

Text title : yantroddhArakamangalAShTakam

File name : yantroddhArakamangalAShTakam.itx

Category : aShTaka, hanumaana, mangala

Location : doc_hanumaana

Transliterated by : Processed by Shree Devi Kumar

Proofread by : PSA Easwaran

Description/comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : December 8, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2023

*sanskritdocuments.org*

# શ્રીયન્ત્રોદ્ધારકમઙ્ગલાષ્ટકમ્

યન્ત્રોદ્ધારકનામકો રઘુપતેરાજ્ઞાં ગૃહીત્વાર્ણવં
તીર્ત્વાશોકવને સ્થિતાં સ્વજનનીં સીતાં નિશામ્યાશુગઃ ।
કૃત્વા સંવિદમઙ્ગુલીયકમિદં દત્વા શિરોભૂષણં
સઙ્ગૃહ્યાર્ણવમુત્પપાત હનૂમાન્ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૧॥

પ્રાપ્તસ્તં સદુદારકીર્તિરનિલઃ શ્રીરામપાદામ્બુજં
નત્વા કીશપતિર્જગાદ પુરતઃ સંસ્થાપ્ય ચૂડામણિમ્ ।
વિજ્ઞાપ્યાર્ણવલઙ્ઘનાદિશુભકૃન્નાનાવિધં ભૂતિદં
યન્ત્રોદ્ધારકનામમારુતિરયં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૨॥

ધર્માધર્મવિચક્ષણઃ સુરતરુર્ભક્તેષ્ટસન્દોહને
દુષ્ટારાતિકરીન્દ્રકુમ્ભદલને પઞ્ચાનનઃ પાણ્ડુજઃ ।
દ્રૌપદ્યૈ પ્રદદૌ કુબેરવનજં સૌગન્ધિપુષ્પં મુદા
યન્ત્રોદ્ધારકનામમારુતિરયં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૩॥

યઃ કિર્મીર-હિડિમ્બ-કીચક-બકાન્ પ્રખ્યાતરક્ષોજનાન્
સંહૃત્ય પ્રયયૌ સુયોધનમહન્ દુઃશાસનાદીન્ રણે ।
ભિત્વા તદ્ધૃદયં સ ઘોરગદયા સન્મઙ્ગલં દત્તવાન્
યન્ત્રોદ્ધારકનામમારુતિરયં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૪॥

યો ભૂમૌ મહદાજ્ઞયા નિજપતેર્જાતો જગજ્જીવને
વેદવ્યાસપદામ્બુજૈકનિરતઃ શ્રીમધ્યગેહાલયે ।
સમ્પ્રાપ્તે સમયે ત્વભૂત્ સ ચ ગુરુઃ કર્મન્દિચૂડામણિઃ
યન્ત્રોદ્ધારકનામમારુતિરયં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૫॥

મિથ્યાવાદકુભાષ્યખણ્ડનપટુર્મધ્વાભિધો મારુતિઃ
સદ્ભાષ્યામૃતમાદરાન્મુનિગણૈઃ પેપીયમાનં મુદા ।
સ્પૃષ્ટ્વા યઃ સતતં સુરોત્તમગણાન્ સમ્પાત્યયં સર્વદા
યન્ત્રોદ્ધારકનામમારુતિરયં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૬॥

પાકાર્કાર્કસમાનસાન્દ્રપરમાસાકીર્કકાકારિભિ-
ર્વિધ્યાસાર્કજવાનરેરિતરુણા પીતાર્કચક્રઃ પુરા ।
કઙ્કાર્કાનુચરાર્કતપ્તજરયા તપ્તાઙ્ગુજાતાન્વિતો
યન્ત્રોદ્ધારકનામમારુતિરયં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૭॥

શ્રીમદ્વ્યાસમુનીન્દ્રવન્દ્યચરણઃ શ્રેષ્ઠાર્થસમ્પૂરણઃ
સર્વાઘૌઘનિવારણઃ પ્રવિલસન્મુદ્રાદિસમ્ભૂષણઃ ।
સુગ્રીવાદિકપીન્દ્રમુખ્યશરણઃ કલ્યાણપૂર્ણઃ સદા
યન્ત્રોદ્ધારકનામમારુતિરયં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૮॥

યન્ત્રોદ્ધારકમઙ્ગલાષ્ટકમિદં સર્વેષ્ટસન્દાયકં
દુસ્તાપત્રયવારકં દ્વિજગણૈઃ સઙ્ગૃહ્યમાણં મુદા ।
ભક્તાગ્રેસરભીમસેનરચિતં ભક્ત્યા સદા યઃ પઠેત્
શ્રીમદ્વાયુસુતપ્રસાદમતુલં પ્રાપ્નોત્યસૌ માનવઃ ॥ ૯॥

ઇતિ શ્રીભીમસેનવિરચિતં શ્રીયન્ત્રોદ્ધારકમઙ્ગલાષ્ટકં સમ્પૂર્ણમ્ ।

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran

*Shri Yantroddharaka Mangala Ashtakam*
pdf was typeset on March 3, 2023

Please send corrections to *sanskrit@cheerful.com*